३८ चपलः ३९ विहगः ४० प्रकम्पनः ४१ नभःस्वरः ४२ निश्वासकः ४३ स्तनूनः ४४ पृषताम्पतिः। इति जटाधरः ॥ * ॥ स च सृष्टिकाले आकाशाज्जातः। यथा। तस्माद्वा एतस्मादात्मन आकाशः संभूत आकाशाद्वायुः। इत्यादि तैत्तिरीयश्रुतिः ॥ * ॥ कश्यपादश्वायुरदितेः पुत्त्राः। ते सर्व्वे अप्रजाः। इन्द्रेण देवत्वं प्रापिताः। शरीरान्तर्व्वाह्यभेदेन दशधा। यथा। प्राणः १। तस्य कर्म्म वहिर्गमनम्। अपानः २। तस्य कर्म्म अधोगमनम्। व्यानः ३। तस्य कर्म्म आकुञ्चनप्रसारणादि। समानः ४। तस्य कर्म्म अशितपीतादीनां समं नयनम्। उदानः ५। तस्य कर्म्म ऊर्द्धनयनम्।

"उद्गारे नाग ६ आख्यातः कूर्म्म ७ उन्मीलने स्मृतः।
कृकरः ८ क्षुत्करो ज्ञेयो देवदत्तो ९ विजृम्भणे।
न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः १०॥"
इति भागवतटीकायां श्रीधरस्वामी ॥ * ॥

अन्यच्च।

"द्वितीयं मारुतो भूतं त्वगध्यात्मञ्च विश्रुता।
स्प्रष्टव्यमधिभूतञ्च विद्युत्तत्राधिदैवतम् ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥

तस्य गुणाः। यथा,—

"वायोरनियमस्पर्शो वादस्थानं स्वतन्त्रता।
बलं शैघ्र्यञ्च मोक्षञ्च कर्म्म चेष्टात्मता भवः ॥"
इति महाभारते मोक्षधर्म्मः ॥ * ॥

अनियमस्पर्शः। अनुष्णाशीतस्पर्शः १। वादस्थानम्। वागिन्द्रियगोलकानि २। स्वतन्त्रता। गमनादौ ३। बलम् ४। शैघ्र्यम् ५। मोक्षः छन्दादेः ६। कर्म्म। उत्क्षेपणादि ७। चेष्टा श्वासप्रश्वासादि ८। आत्मता प्राणरूपेण चिदाधित्वम् ९। भवः। जन्ममरणे १०। इति तट्टीका ॥*॥ न्यायमते अस्य गुणादिर्यथा,—

"अपाकजानुष्णाशीतस्पर्शस्तु पवने मतः।
तिर्य्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ॥
पूर्व्ववन्नित्यतादुक्तं देहव्यापि त्वगिन्द्रियम्।
प्राणादिस्तु महावायुपर्य्यन्तविषयो मतः ॥"
इति भाषापरिच्छेदः ॥

"वायुं निरूपयति अपाकजेति। अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वात् अपाकजेति। अपाकजस्पर्शस्य जलादावपि सत्त्वात् उक्तमनुष्णाशीत इति। एतेन वायोर्व्विजातीयस्पर्शो दर्शितः। तज्जनकतावच्छेदकं वायुत्वमिति भावः। एष वायुः स्पर्शादिलिङ्गकः। वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते। विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पनेन च वायोरनुमानात्। तथा च वायुर्न प्रत्यक्षस्तथाग्रे वक्ष्यते। वायुर्न्नित्योऽनित्यो वा परमाणुरूपो नित्यस्तदन्योऽनित्यः सावयवश्च। सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात्। अत्र शरीरमयोनिजं पिशाचादीनाम्। देहव्यापीति। शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक्। तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात्। अङ्गसंसर्गिसलिलशैत्यव्यञ्जकव्यजनवातवत्। विषयं दर्शयति प्राणादिरिति। यद्यप्यनित्यो वायुश्चतुर्व्विधः तस्य चातुर्व्विध्यं प्राणादिना इत्युक्तमाकरे। तथापि संक्षेपात् अत्र त्रैविध्यमुक्तं प्राणस्त्वेक एव हृदादिनानास्थानवशात् मुखनिर्गमादिनानाक्रियावशाच्च नानासंज्ञां लभते इत्यर्थः।" इति सिद्धान्तमुक्तावली ॥*॥ अस्योत्पत्तिर्यथा,—

पुलस्त्य उवाच।

"प्रविश्य जठरं शक्रो दैत्यमातुः पुरन्दरः।
ददर्शोर्द्धमुखं बालं कटिन्यस्तकरं महत् ॥
तेनैव गर्भं दितिजं वज्रेण शतपर्व्वणा।
चिच्छेद सप्तधा ब्रह्मन् स रुरोद सुविस्वरम् ॥
शक्रोऽपि प्राह मा मूढ़ रुदस्वेति सघर्घरम्।
इत्येवमुक्त्वा चैकैकं भूयश्चिच्छेद सप्तधा ॥
ते जाता मरुतो नाम देवा दित्याः शतक्रतोः।
मातुरेवापचारेण बलवीर्य्यपुरस्कृताः ॥"
इति वामने ६८ अध्यायः ॥

"यदमी भवता प्रोक्ता मरुतो दितिसम्भवाः।
तत् केन पूर्व्वमासन् वै मरुन्मार्गेण कथ्यताम् ॥

पुलस्त्य उवाच।

श्रूयतां पूर्व्वमरुतामुत्पत्तिं कथयामि ते।
स्वायम्भुवं समारभ्य यावन्मन्वन्तरं त्विदम् ॥
स्वायम्भुवस्य पुत्त्रोऽभून्मनोर्नाम प्रियव्रतः।
तस्यासीत् सवनो नाम पुत्त्रस्त्रैलोक्यपूजितः ॥
खमुत्पपाताथ स कामचारी
समं महिष्या वसुमानपुत्त्रा।
रराम तन्व्या सह कामचारी
ततोऽम्बरात् प्राच्यवतास्य शुक्रम् ॥
पतिभिः समनुज्ञाताः पपुः पुष्करसंस्थितम्।
तं शुक्रं पार्थिवेन्द्रस्य मन्यमानास्तदामृतम् ॥
पीतमात्रेण शुक्रेण पार्थिवेन्द्रोद्भवेन च।
ब्रह्मतेजोविहीनास्ता जाताः पत्न्यस्तपस्विनाम् ॥
सुषुवुः सप्त तनयांस्ते रुदन्तोऽथ भैरवम्।
तेषां रुदितशब्देन सर्व्वमापूरितं जगत् ॥
अथाजगाम भगवान् ब्रह्मलोकात् पितामहः।
समभ्येत्याब्रवीद्बालान् मा रुदध्वं महाबलाः ॥
मरुतो नाम यूयं वै भविष्यध्वं वियच्चराः।
इत्येवमुक्त्वा देवेशो ब्रह्मा लोकपितामहः ॥
तानादाय वियच्चारी मारुतानादिदेश च।
ते चासन् मरुतस्त्वाद्या मनोः स्वायम्भुवान्तरे ॥*॥
स्वारोचिषे तु मरुतो वक्ष्यामि शृणु नारद।
स्वारोचिषस्य पुत्त्रश्च श्रीमानासीत् क्रतुध्वजः ॥
तस्य पुत्त्रा भवन् सप्त सप्तार्चिःप्रतिमा मुने ! ।
तपोऽर्थं ते गताः शैलं महामेरुं नभश्चराः ॥
आराधयन्तो ब्रह्माणं पदमैन्द्रमभीप्सवः।
ततो विपश्चिन्नामाथ सहस्राक्षो भयातुरः।
पृतनामप्सरोमुख्यां प्राह नारद वाक्यवित् ॥
यथा हि तपसो विघ्नं तेषां भवति सुन्दरि ! ।
तथा कुरुष्व मा तेषां सिद्धिर्भवतु वै यथा ॥
इत्येवमुक्ता शक्रेण पृतना रूपशालिनी।
तत्राजगाम त्वरिता यत्र तप्यन्ति ते तपः ॥
आश्रमस्याविदूरे तु नदी मन्दोदवाहिनी।
तस्यां स्नातुं समायाताः सर्व्व एव सहोदराः ॥
सा तु स्नातुं सुचार्व्वङ्गी त्ववतीर्णा महानदीम्।
ददृशुस्ते नृपाः स्नातुं ततश्चुक्षुभिरे मुने ॥
तेषाञ्च प्राच्यवत् शुक्रं तत् पपौ जलचारिणी।
शङ्खिनी ग्राहमुख्यस्य महाशङ्खस्य वल्लभा।
ते वै विनष्टतपसो जग्मू राज्यञ्च पैतृकम् ॥
अथो बहुतिथे काले सा ग्राही शङ्खरूपिणी।
समुद्धृता महाजालैर्मत्स्यबन्धेन मानिनी ॥
स तां दृष्ट्वा महाशङ्खीं स्थलस्थां मत्स्यजीवनः।
निवेदयामास तदा क्रतुध्वजसुतेषु वै ॥
ततोऽभ्येत्य महात्मानो योगिनो योगधारिणः।
नीत्वा स्वमन्दिरं सर्व्वे पुरवाप्यां समुत्सृजन् ॥
ततः क्रमाच्छङ्खिनी सा सुषुवे सप्त वै शिशून्।
जातमात्रेषु पुत्त्रेषु मोक्षभावमगाच्च सा ॥
अमातृपितृका बाला जलमध्यविचारिणः।
स्तन्यार्थिनो वै रुरुदुरथाभ्यागात् पितामहः ॥
मा रुदध्वमिति प्राह मारुतो नाम पुत्त्रकाः।
यूयं देवा भविष्यध्वं वायवोऽम्बरचारिणः ॥
इत्येवमुक्त्वादाय सर्व्वांस्तान् देवतान् प्रति।
नियोज्य च मरुन्मार्गे वैराजभवनं गतः ॥
एवमासंश्च मरुतो मनोः स्वारोचिषान्तरे ॥*॥
औत्तमे मरुतो ये च तान् शृणुष्व तपोधन।
औत्तमस्यान्ववाये च राजासीन्निषधाधिपः।
वपुष्मानिति विख्यातो वपुषा भास्करोपमः ॥
तस्य पुत्त्रो गुणश्रेष्ठो ज्योतिष्मान् धार्म्मिकोऽभवत्।
स पुत्त्रार्थी तपस्तेपे नदीं मन्दाकिनीमनु ॥
तस्य भार्य्या च सुश्रोणी देवाचार्य्यसुता शुभा।
तपश्चरणयुक्तस्य बभूव परिचारिका ॥
तेजोयुक्ता सुचार्व्वङ्गी दृष्टा सप्तर्षिभिर्व्वने।
तां तथा चारुसर्व्वाङ्गीं दृष्ट्वाथ तपसा कृशाम् ॥
पप्रच्छुस्तपसो हेतुं तस्यास्तद्भर्त्तुरेव च।
साब्रवीत्तनयार्थाय आवाभ्यां वै तपःक्रिया ॥
ते चास्यै वरदा ब्रह्मन् जाताः सप्त महर्षयः ॥
व्रजध्वं तनयाः सप्त भविष्यन्ति न संशयः।
युवयोर्गुणसंयुक्ता महर्षीणां प्रसादतः।
इत्येवमुक्त्वा जग्मुस्ते सर्व्व एव महर्षयः।
सोऽपि राजर्षिरगमत् सभार्य्यो नगरं निजम् ॥
ततो बहुतिथे काले सा राज्ञो महिषी प्रिया।
अवाप गर्भं तन्वङ्गी तस्मान्नृपतिसत्तमात् ॥
गुर्व्विण्यामथ भार्य्यायां ममाराशु नराधिपः।
सा चाप्यारोढुमिच्छन्ती भर्त्तारं वै पतिव्रता ॥
निवारिता तदामात्यैर्न तथापि व्यतिष्ठत।
तस्यामालिङ्ग्य भर्त्तारं चितायामारुरोह सा ॥
ततोऽग्निमध्यात् सलिले मांसपेश्यपतन्मुने।
साम्भसा सुखशीतेन संसिक्ता सप्तधाभवत्।
तेऽजायन्ताथ मरुत औत्तमस्यान्तरे मनोः ॥*॥